# शब्दविमर्शः - क्वरप्प्रत्ययान्तशब्दानामवलोकनम्।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

## 1. नश्वरः।

अभ्यवहारादीनन्यानुपायनांश्चानीयमानं गुहमाह रामो नह्यस्माभिः प्रतिग्राह्यं सखे देयं तु सर्वदा। इति तेन वयं सर्वे अनुनीता महात्मना।। इत्ययोध्याकाण्डे रामायणे (२.८७.१७)। इदञ्च विप्रतिषिद्धम्। कथमिव ? एवञ्चेत्सीतां रावणो गृह्णात्विति कुतो वा नामन्यत रामः ? अन्याय्यमेतत्। रामः स्वकीयं राज्याधिकारमपि भ्रात्रे सन्यस्य वनं जगाम। यद्यपि न तत्स्वाधिकारादयच्छत्। प्रत्युत छलेन तत्तोऽपहृता कैकेयी। जानन्नपि तां न निरभर्त्सयत्। रामो बालिनं हत्वा सुग्रीवाय राज्यं प्रत्यर्पयामास। रावणं हत्वा विभीषणाय लङ्कां प्रादात्। अन्यानसङ्ख्याकान् राक्षसानाहवे हत्वा निष्कण्टकमारण्यं तापसेभ्यः प्रादात्। सीतां तु परं स्वीयां सहधर्मिणीं न जहौ। रावणादयो राक्षसवृत्तयः। बहुभिः स्त्रीभिः रममाणाः। रामस्तु स्वीयां सहधर्मिणीमपहृतां स्वायत्तीकर्तुम् उदयुञ्जत। सीतापि रामपार्श्वमानेतुं प्रायतत। न कथञ्चिदपि रावणवशंवदा। जीवनान्तेऽपि यद्यज्जितं तत्सर्वं पुत्रादिभ्यो न्यवेदयत्। अत एव खलु त्यागाय सम्भृतार्थानामिति कालिदासो रघुवंशं स्तौति। परन्त्वपरार्द्धे यशसे विजिगीषूणां रघूणामन्वयं वक्ष्य इति खलु रघुवंशवर्णनमुपक्रमते। आस्तान्नाम का वा क्षतिः ? नाम निस्तुलमहिमानोऽपि न सर्वात्मना त्यागायाशक्नुवन्निति सारः। अतो हि खलु रघुवंशराजानः यशसे विजिगीषव आसन्निति कविना फणितम्। एतच्च महतां लक्षणम्। पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णव इति वदन् माघोऽन्यत्रैनमेवाशयं द्रढयतीव। अत एव सर्वोऽपि सत्वानुरूपं फलमिच्छतीति महदुक्तिश्च सङ्गतार्था भवति। रघुवंशश्चानश्वरेण यशसा निरतिशयशोभावान्। कथमेतद्भवितुमर्हति यल्लोकेषु नश्यत्सु तत्सम्बन्धिनो यशोऽनश्वरमिति ? यदाह भागवतकारः - वदन्ति विश्वं कवयः स्म नश्वरं पश्यन्ति चाध्यात्मविदो विपश्चितः। तथापि मुह्यन्ति तवाज मायया सुविस्मितं कृत्यमजं नतोऽस्मि तम्।। इति भागवते (५.१८.४)। विश्वं नश्वरं वदन्तः कवयस्तत्तथा पश्यन्तः पण्डिताश्च त्वामेव भजन्ते। यतो हि विजानन्तोऽप्येते विपश्चितस्तव मायया तत्र मुह्यन्ति। अजस्त्वेकस्तान्पातुमीश इत्याशयः। श्रीवंशीधरो भावार्थदीपिकाप्रकाशकर्ता विश्वनाथवचः प्रदर्शयति। 'ननु विद्वांसोऽपि ममैव मायया मुह्यन्ति चेत्तर्हि मय्येव दोषं प्रसञ्जयसीति तत्र मायायास्तत्कार्यस्य च त्वदीयत्वेऽपि त्वं ततः पृथक् वर्तस इत्याह विश्वोद्भवेति अग्रिमपद्ये' इति। तदास्ताम्। वदन्ति विश्वं कवयः स्म नश्वरमित्युक्ते कोऽयं कविः ? न त्विह कालिदासादायः कवयः स्मृताः। कविशब्दोऽत्र पण्डितवाची। सॅख्यावान्पण्डितः कविरित्यमरः। ते चावस्थान्तरगामित्वरूपधर्मवज्जगदित्याहुरित्याशयः। सन्तु नाम कवय इति को दोषः ? के पुनस्ते कवयः ? मत्वा विश्वमनश्वरं निविशते संसारकारागृहे। सन्दृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु सन्न्यस्यति। इत्येवं गायन्तो भर्तृ हरिप्रभृतयः। स हि महान् दार्शनिको वैय्याकरणश्च। कथमस्मिन्कवित्वापादनं युज्यते। भट्टिकाव्यस्य रावणविजयमित्यपराभिधस्य प्रणेता अयमिति सन्तः सङ्गिरन्ते। पाण्डित्येनापि कविः।

नाम ये कालपाशवशङ्गता अपि इदानीन्तने लोके प्रथन्ते ते तेन तेन लोकनमस्कृतेन कर्मणा यशश्चिच्युः। यथा शिबिः जीमूतवाहनश्च। कर्णस्त्वचं शिबिर्मासं जीवं जीमूतवाहनः। ददौ दधीचिरस्थीनि किमदेयं महात्मनामिति बहुधा श्रुतम्। तेनैव श्लाघ्यतरेण कर्मणा ते यशश्शरीरा बभूवुः। अतोऽनश्वरं यशः।

एवञ्च यशसोऽनश्वरत्वमत्र चर्चाविषयः। मैवं मनुत। अनश्वरशब्दोऽत्र चर्चाविषयः। क्वरप्प्रत्ययान्ताः शब्दाः विचार्यन्ते। तद्विधायकसूत्रोपात्तेषु धातुष्वयमन्यतमः। 'णश अदर्शने' (दिवा.११९४) इत्यस्मात् 'इण्नशजिसर्त्तिभ्यः क्वरप्' (३.२.१६३) इति तद्धर्मणि प्रत्ययः। अध्रुवमित्यर्थः। ध्रुवन्तु कूटस्थमविचाल्यनपायोपजनविकारि यत्तन्नित्यमित्येवं तत्र तत्र शास्त्रेषु निरुक्तम्। विनश्यतीत्यपरभावस्यादिमाचष्टे इत्यादि नैरुक्तधर्मवति नश्वरशब्दो वर्तते।

तदास्तामुपरिष्टान्मत्वा विश्वमनश्वरं निविशते संसारकारागृहे सन्दृश्य क्षणभङ्गुरम् इत्युदाहरणे दृष्टो भङ्गुरशब्दः कथं निष्पन्नः ? अप्यसौ क्वरबन्तः ? नह्ययं क्वरबन्तः। प्रत्युत 'भञ्जो आमर्द्दने' (रुधा.१४५४) इत्यस्माद्धातोः 'भञ्जभासमिदो घुरच्' (३.२.१६१) इति घुरच्प्रत्ययान्तः। तथा भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भव इति भर्तृहरिः वैराग्यशतके। तत्रैव समनन्तरं भो साधो क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः इति। स चान्योऽभङ्गुरस्य लेखस्य विषयः।

तदस्तु। अत्र कश्चनान्यः सन्देहः। कोऽसौ सन्देहः ? कठोपनिषदि 'श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः' इत्यादौ किं श्वभावो नाम ? किञ्चित्कालिकत्वं भाविकालिकत्वं वा सूच्यते ? यतो हि नश्वरशब्देऽनश्वरशब्दे चायं मध्ये श्वशब्दः श्रूयते। श्वो नाम उपाशंसनीयः कालः। अर्थाद् प्राणिभिः स्वाभिप्रायविषयीकृत्य आशंस्तव्यो भवत्यनागतत्वादित्युपाशंसनीयः। श्वशब्द आगामिपर्यायवची। अतो नश्वरशब्दस्य श्वोऽभावः अनश्वरशब्दस्य च श्वो भावो व्यज्यते।

सूत्रे 'इण् गतौ' (अदा.१०४५), 'णश अदर्शने' (दिवा.११९४), 'जि जये' (भ्वा.५६१), 'सृ गतौ' (भ्वा.९३२) इत्येतेभ्यो धातुभ्यस्तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु क्वरप्प्रत्ययो विहितः। इत्वरशब्दस्तु पूर्वस्मिन् प्रबन्धे प्रपञ्चितः। इहेदानीं नश्वरशब्दोऽवसितः। अन्येषां रूपाण्यग्रे वक्ष्यन्ते।

*